# Tejovardhanastotram Varamahaganapati Mantraksharavalistotram

# તેજોવર્ધનસ્તોત્રમ્ અથવા વરમહાગણપતિ મન્ત્રાક્ષરાવલિસ્તોત્રમ્

## Document Information

Text title : tejovardhanastotram varamahAgaNapatimantrAkSharAvalistotram

File name : tejovardhanastotram.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Veeramani Nambi veeramani.nambi at gmail.com

Proofread by : Veeramani Nambi, Sunder Hattangadi

Description/comments : From stotrArNavaH 01-02

Latest update : August 26, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2022

*sanskritdocuments.org*

# તેજોવર્ધનસ્તોત્રમ્ અથવા વરમહાગણપતિ મન્ત્રાક્ષરાવલિસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

વિના તપો વિના ધ્યાનં વિના હોમં વિના જપમ્ ।
અનાયાસેન વિઘ્નેશપ્રીણનં વદ મે પ્રભો ॥ ૧॥

ઈશ્વર ઉવાચ ।
મન્ત્રાક્ષરાવલિસ્તોત્રં સર્વસૌભાગ્યવર્ધનમ્ ।
દુર્લભં દુષ્ટમનસાં સુલભં શુદ્ધચેતસામ્ ॥ ૨॥

મહાગણપતિપ્રીતિપ્રતિપાદકમઞ્જસા ।
કથયામિ ઘનશ્રોણિ કર્ણાભ્યામવતંસય ॥ ૩॥

ઓઙ્કારવલયાકારમુચ્ચત્કલ્લોલમાલિનમ્ ।
ઐક્ષવં ચેતસા વીક્ષે સિન્ધુસન્ધુક્ષિતસ્વનમ્ ॥ ૪॥

શ્રીમતશ્ચાસ્ય જલધેરન્તરભ્યુદિતં નુમઃ ।
મણિદ્વીપં મદાકલ્પમહાકલ્પં મહોદયમ્ ॥ ૫॥

હ્રીતિમાદધતા ધામ્ના ધામ્નામીશકિશોરકે ।
કલ્પોદ્યાનસ્થિતં વન્દે ભાસ્વન્તં મણિમણ્ડપમ્ ॥ ૬॥

ક્લીબસ્યાપિ સ્મરોન્માદકારિશૃઙ્ગારશાલિનઃ ।
તન્મધ્યે ગણનાથસ્ય મણિસિંહાસનં ભજે ॥ ૭॥

ગ્લૌં કલાભિરિવાચ્છાભિસ્તીવ્રાદિનવશક્તિભિઃ ।
સુષ્ટં લિપિમયં પદ્મં ધર્માદ્યાશ્રયમાશ્રયે ॥ ૮॥

ગમ્ભીરમિવ તત્રાબ્ધિં વસન્તં ત્ર્યસ્રમણ્ડલે ।
ઉત્સઙ્ગતલલક્ષ્મીકમુદ્યતિગ્માંશુપાટલમ્ ॥ ૯॥

ગદેક્ષુકામુકરુજા ચક્રામ્બુજગુણોત્પલે ।
વ્રીહ્યગ્રનિજદન્તાગ્રં ભૂષિતં માતુલિઙ્ગકૈઃ ॥ ૧૦॥

ણષષ્ઠવર્ણવાચ્યસ્ય દારિદ્ર્યસ્ય વિભઞ્જનૈઃ ।
એતૈરેકાદશકરાનલં કુર્વાણમુન્મદમ્ ॥ ૧૧॥

પરાનન્દમયં ભક્તપ્રત્યૂહવ્યૂહનાશનમ્ ।
પરમાર્થપ્રબોધાબ્ધિં પશ્યામિ ગણનાયકમ્ ॥ ૧૨॥

તત્પુરઃ પ્રસ્ફુરદ્બિલ્વમૂલપીઠસમાશ્રયૌ ।
રમારમેશૌ વિમૃશામ્યેવશુભદાયકૌ ॥ ૧૩॥

યેન દક્ષિણભાગસ્થન્યગ્રોધતલમાસ્થિતમ્ ।
સકલં સાયુધં વન્દે તં સામ્બં પરમેશ્વરમ્ ॥ ૧૪॥

વરસમ્ભોગરસિકૌ પશ્ચિમે પિપ્પલાશ્રયૌ ।
રમણીયતરૌ વન્દે રતિપુષ્પશિલીમુખૌ । ૧૫॥

રમમાણૌ ગણેશાનોત્તરદિક્ફલિનીતલે ।
ભૂભૂધરામ્બુદારાભૌ ભજે ભુવનપાલકૌ ॥ ૧૬॥

વનમાલાવપુર્જ્યોતિકડારિતકકુમ્ટાઃ ।
હૃદયાદિરઙ્ગદેવિ રઙ્ગરક્ષાકૃતે નમઃ ॥ ૧૭॥

રદકાણ્ડરુચિજ્યોત્સ્નાકાશગણ્ડસ્રવન્મદમ્ ।
ઋધ્યાશ્લેષકૃતામોદમામોદં દેવમાશ્રયે ॥ ૧૮॥

દલત્કપોલવિગલં મદધારાબલાહકમ્ ।
સમૃદ્ધિતડિદાશ્લિષ્ટં પ્રમોદં હૃદિ ભાવયે ॥ ૧૯॥

સકાન્તિકાન્તિતિલકાપરિરબ્ધતનું ભજે ।
ભુજપ્રકાણ્ડસચ્છાયં સુમુખં કલ્પપાદપમ્ ॥ ૨૦॥

વન્દે તુન્દિલમિન્ધાનં ચન્દ્રકન્દલશીતલમ્ ।
દુર્મુખં મદનાવત્યા નિર્મિતાલિઙ્ગિનં પુરા ॥ ૨૧॥

જમ્ભવૈરિકૃતાભ્યર્ચ્યૌ જગદભ્યુદયપ્રભૌ ।
અહં મદદ્રવાવિઘ્નૌ હતયે એનસાં શ્રયે ॥ ૨૨॥

નમઃ શૃઙ્ગારરુચિરૌ નમત્સર્વસુરાસુરૌ ।
દ્રાવિણીવિઘ્નકર્તારૌ દ્રાવયેતાં દરિદ્રતામ્ ॥ ૨૩॥

મેદુરં મૌક્તિકાસારં વર્ષન્તૌ ભક્તિશાલિનામ્ ।
વસુધારાશઙ્ખનિધિવાક્યપુષ્પાઞ્જલિના સ્તુમઃ ॥ ૨૪॥

વર્ષન્તૌ રત્નવર્ષેણ બલદ્બાલાતપસ્વિપૌ ।
વરદાનુમતૌ વન્દે વસુધાપદ્મશેવધી ॥ ૨૫॥

શમતાધિમહાવ્યાધિસાન્દ્રાનન્દકરમ્બિતાઃ ।
બ્રાહ્મમ્યાદીઃ કલયે શક્તીઃ શક્તીનામભિવૃદ્ધયે ॥ ૨૬॥

મામવન્તુ મહેન્દ્રાદ્યાઃ દિક્પાલાઃ દર્પશાલિનઃ ।
તં નુમઃ શ્રીગણાધીશં સવાહાયુધશક્તિકમ્ ॥ ૨૭॥

નવીનપલ્લવચ્છાયાદાયાદવપુરુજ્વલમ્
મદસ્ય કટનિષ્યન્દસ્રોત સ્વિત્કટકોદરમ્ ॥ ૨૮॥

યજમાનતનું યાગરૂપિણં યજ્ઞપુરુષમ્ ।
યમં યમવતામર્ચ્યં યત્નભાજામદુર્લભમ્ ॥ ૨૯॥

સ્વારસ્યં પરમાનન્દસ્વરૂપં સ્વયમુદ્ગતમ્ ।
સ્વયં હવ્યં સ્વયં વૈદ્યં સ્વયં કૃત્યં ત્રયીકરમ્ ॥ ૩૦॥

હારકેયૂરમુકુટકિઙ્કિણીગદકુણ્ડલૈઃ ।
અલઙ્કૃતં ચ વિઘ્નાનાં હર્તારં દેવમાશ્રયે ॥ ૩૧॥

મન્ત્રાક્ષરાવલિસ્તોત્રં કથિતં તવ સુન્દરિ ।
સમસ્તમીપ્સિતં તેન સમ્પાદય શિવે શિવમ્ ॥ ૩૨॥

ઇતિ તેજોવર્ધનસ્તોત્રમ્ અથવા મન્ત્રાક્ષરાવલિસ્તોત્રં સમ્પૂર્ણમ્ ॥

ૐ શ્રીં હ્રીં ક્લીં ગ્લૌં ગં ગણપતયે વરવરદ
સર્વજનં મે વશમાનય સ્વાહા ।

શ્રીવરમહાગણપતિમન્ત્રાક્ષરાવલિસ્તોત્રમ્
ગણપતિમન્ત્રાક્ષરાવલિઃ

The attached links have texts with variations.

Encoded by Veeramani Nambi veeramani.nambi at gmail.com
Proofread by Veermani Nambi, Sunder Hattangadi

*Tejovardhanastotram Varamahaganapati Mantraksharavalistotram*

pdf was typeset on January 23, 2022

Please send corrections to *sanskrit@cheerful.com*